जन्मवर्वरकथा

आत्मप्रशंसया पुलकितो जनः शास्त्रज्ञानात् न विरतो भवेत् । शास्त्रानुसारिणी यथार्थविवेचना सर्वत्र करणीया, नोचेत् जनः उपहासस्य पात्रं भवेत् । शास्त्रं जानन् अपि बुद्धिहीनः जनः जीवने सफलतां न प्राप्नोति ।

आसीत् कौशाम्बी नाम नगरी । तत्र देवधरनामा गणकः प्रतिवसति स्म । तस्य शान्तिधरो नाम पुत्रो बभूव । स च जन्मवर्वरः पित्रा गुणिना प्रयत्नेन पाठ्यमानः पदार्थं नाधिगच्छति ।

तथापि लोकद्वयप्रत्याशाङ्कुरः सकलमनोरथस्थानम् एक एव तस्य पुत्रः । स्नेहाधिक्यात् स तं यत्नेन पाठयति स्म । ततो महता समयेन महता च पितुः श्रमेण स शुकवदभ्यस्तशास्त्रः अभवत् ।

तमधिगतशास्त्रं कृत्वा गणकश्चिन्तितवान् । ''यदेनं राज्ञः परिचितगुणं करोमि ।'' ततः स गणको राज्ञः समीपं तं पुत्रं नीतवान् ।

तं पुरोवर्त्तिनं दृष्ट्वा राजोवाच – ''अरे देवधर गणक ! किमधीतम् अनेन पुत्रेण ?''

गणक उवाच – ''देव ! गणकशास्त्रम् अधीतम् अनेन । प्रश्नस्योत्तरं च जानाति । ततोऽद्य देवेन पृष्टो यदि प्रश्नस्योत्तरं विज्ञास्यति तदध्ययनफलं प्राप्स्यति ।''

तदनन्तरं सकौतुको राजा सुवर्णाङ्गुलीयकम् एकं मुष्टौ कृत्वा तमुवाच – ''अये गणककुमार ! जानीहि तावत् किं वस्तु मम मुष्टौ वर्त्तते इति ?''

ततो गणकपुत्रः कठिनीमादाय शास्त्रानुसारेण गणयति स्म । गणनया च विदित्वा अब्रवीत् – ''देव ! न जीवो न मूलं, किन्तु धातुरूपं वस्तु देवस्य मुष्टौ तिष्ठति ।''

राजोवाच - ''त्रुटिशून्यगणना ।''

गणकपुत्रः पुनरुवाच - ''मण्डलाकृति वस्तु वर्त्तते ।''

राजोवाच - ''समुचितं वचनम्''

गणकपुत्रः पुनरवदत्- ''गुरुद्रव्यं, मध्ये शून्यं च भवति ।''

राजोवाच - ''साधु गणककुमार साधु ! भद्रं जानासि, कथय, कथय ।''

ततः राजप्रशंसया जातरभसः पुलकितबाहुमूलः सः त्वरितं कथयामीति गणनामपहाय स्वतर्केण कथितवान्- ''देव ! पाषाणनिर्मितं छिद्रयुक्तं चक्रमेकं विद्यते देवस्य मुष्टिगर्भे ।''

राजा विहस्य उवाच - ''अये गणक ! तव पुत्रः शास्त्रकृताभ्यासोऽस्ति, किन्तु अबुद्धिः । यावद्दूरं शास्त्रानुसारिण्या गणनया कथितं तावत् समुचितम् एव । अन्यच्च स्वकीयतर्केण यदुक्तं तत्र विसंवादो जातः ।

किमधिकम् ? अरे मूर्ख गणकपुत्र ! त्वं न जानास्येव महत् एतादृशं विशालं पाषाणचक्रं मनुष्यमुष्टिगर्भे न सम्भवति । तत् कथम् असंगतः एवायं तर्कस्तव चेतसि आयातः । तस्मादवश्यं बुद्धिहीनोऽसि ।'' इत्यभिधाय राजा तस्मै किंचिद्वस्तु दत्त्वा तमाज्ञप्तवान्–

गुरुं निषेवन्नपि जीवनाय
भ्रमन् धरित्र्यामपि यावदम्बुधि ।
अधीत्य शास्त्राण्यपि चिन्तयन् मुहु–
र्धिया विहीनो न हि याति धन्यताम् ।।

(पुरुषपरीक्षा)

टिप्पणी

वर्वरः – ମୂର୍ଖ, अधिगच्छति – ବୁଝେ, ଜାଣେ । शुकवत् – ଶୁଆପରି । शुकवत् अभ्यस्तशास्त्रः– ଶୁଆ ପରି ଶାସ୍ତ୍ର ଅଭ୍ୟାସ କରିଥିବା ବ୍ୟକ୍ତି । परिचितगुणम् – (ପରିଚିତଃ ଗୁଣଃ ଯସ୍ୟ ତମ୍, ବହୁବ୍ରୀହି) ଯେଉଁ ବ୍ୟକ୍ତିର ଗୁଣର ପରିଚୟ ହୋଇଛି । पुरोवर्त्ती – ସମ୍ମୁଖରେ ଥିବା । अधीतम् – ପଠିତ । गणकशास्त्रम् – ଜ୍ୟୋତିଷଶାସ୍ତ୍ର । देवेन – ପ୍ରଭୁଙ୍କ ଦ୍ୱାରା । अङ्गुलीयकम् – ମୁଦି । मुष्टिः – ମୁଠା । कठिनी – ଖଡ଼ି । विदित्वा – ଜାଣି । त्रुटिशून्यगणना – ଠିକ୍ ଗଣନା । जातरभसः – ଜାତ ଆନନ୍ଦ ଯାହାର , ଆନନ୍ଦିତ । पुलकितः – ରୋମାଞ୍ଚିତ । अपहाय – ଛାଡ଼ି, ତ୍ୟାଗକରି । मुष्टिगर्भे – ମୁଠା ମଧ୍ୟରେ । पाषाणनिर्मितं छिद्रयुक्तं चक्रम् – ପଥରଚକି । विसंवादः – ଅସଙ୍ଗତି, ଅସମ୍ବଦ୍ଧତା । अभिधाय – କହି । आज्ञप्तवान् – ଆଦେଶଦେଲେ । अम्बुधि – ସମୁଦ୍ର ।

अभ्यास :

1. **निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) देवधरः केन भावेन पुत्रं शुकवत् शिक्षितम् अकरोत् ?

(ख) गणकः कथं राज्ञः समीपं पुत्रं नीतवान् ?

(ग) पुत्रं नयन् गणकः राजानं किम् उवाच ?

(घ) शान्तिधरः राज्ञः प्रथमप्रश्नस्य कीदृशम् उत्तरं दत्तवान् ?

(ङ) शान्तिधरस्य मूर्खता कीदृशी ?

(च) राजा विहस्य किम् उवाच ?

(छ) राजा गणकपुत्राय किञ्चित् वस्तु दत्त्वा किम् आज्ञप्तवान् ?

2. **संक्षेपेण उत्तरं लिखत ।**

(क) देवधरनामा गणकः कुत्र अवसत् ?

(ख) देवधरस्य पुत्रस्य नाम किम् ?

(ग) गणकपुत्रः काम् आदाय शास्त्रानुसारेण अगणयत् ?

(घ) कीदृशं वस्तु राज्ञः हस्ते आसीत् ?

(ङ) राजप्रशंसया पुलकितः गणकपुत्रः कां त्यक्तवान् ?

(च) गणकपुत्रः केन उत्तरं कथितवान् ?

(छ) शान्तिधरस्य स्वतर्कानुसारेण राज्ञः मुष्टौ किम् आसीत् ?

(ज) शान्तिधरस्य कुत्र अभ्यासः अस्ति इति राजा उवाच ?

(झ) मनुष्यमुष्टिगर्भे किं न सम्भवति ?

3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।

(क) तं पुरोवर्त्तिनं दृष्ट्वा राजोवाच ।

(व्याप्त्यर्थे द्वितीया, कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया)

(ख) प्रश्नस्य उत्तरं च जानाति । (सम्बन्धे षष्ठी, कृद्योगेषष्ठी, अनादरे षष्ठी)

(ग) किं वस्तु मम मुष्टौ वर्त्तते ।

(अवच्छेदे सप्तमी, स्थानाधिकरणे सप्तमी, कालाधिकरणे सप्तमी) ।

(घ) मण्डलाकृति वस्तु वर्त्तते । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(ङ) मध्ये शून्यं च भवति । (भावे सप्तमी, स्थानाधिकरणे सप्तमी, विषयाधिकरणे सप्तमी)

(च) स गणको राज्ञः समीपं तं पुत्रं नीतवान् ।

(शेषे षष्ठी, समीपशब्दयोगे षष्ठी, कृद्योगे षष्ठी)

(छ) गणकशास्त्रम् अधीतम् अनेन । (सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, प्रयोजनार्थे तृतीया)

(ज) गणनया च विदित्वा अब्रवीत् । (हेतौ तृतीया, करणे तृतीया, प्रकृत्यादिभ्यः तृतीया)

(झ) राजा तस्मै किंचिद् वस्तु दत्त्वा तमाज्ञप्तवान् ।

(दानार्थे चतुर्थी, निवारणार्थे चतुर्थी, तुमुन् लोपे चतुर्थी)

4. वाक्यरचनां कुरुत ।

एव, श्रमेण, अद्य, अये!, चेतसि, कथम्, अवश्यम्, दत्त्वा, अधीत्य, विहीनः ।

5. सन्धिं कुरुत ।

पुत्रः + बभूव , तस्य + इच्छया, यत् + एनम् , मनः + रथम्, गणकः + चिन्तितवान् , यत् + एनम् , शास्त्र + अनुसारेण , कथयामि + इति , यावत् + दूरम् , संवादः + एव, तम् + उवाच, कठिनीम् + आदाय, यत् + उक्तम् ।

6. सन्धिविच्छेदं कुरुत ।

राजोवाच, नाधिगच्छति, ततोऽद्य, पृष्टो यदि, प्रश्नस्योत्तरम्, अन्यच्च, यदुक्तम् , विसंवादो जातः, पुनरवदत् , तमाज्ञप्तवान् , जानास्येव ।

7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/समासनाम चित्वा शुद्धम् उत्तरं लिखत ।

(क) गणकपुत्रम् (गणकः पुत्रः तम्, गणकस्य पुत्रःतम्, गणकाय पुत्रः तम्) ।

(ख) राज्ञः प्रशंसा तया (राजप्रशंसा, राजप्रशंसया, राजप्रशंसायाः) ।

(ग) पाषाणनिर्मितम् (तृतीया तत्पुरुषः, कर्मधारयः, द्विगुः) ।

(घ) देवधरनामा (देवधरस्य नाम, देवधरःनाम यस्य, देवधरः नाम) ।

(ङ) मुष्टेः गर्भः तस्मिन् (मुष्टिगर्भः, मुष्टिगर्भे, मुष्टिगर्भेण) ।

(च) स्वकीयः तर्कः तेन (बहुव्रीहिः, कर्मधारयः, द्विगुः) ।

(छ) अधिगतशास्त्रम्

(अधिगतं शास्त्रं येन तम्, अधिगतं शास्त्रं यस्य तम्, अधिगतं शास्त्रं यस्मिन्) ।

(ज) अविद्यमाना बुद्धिः यस्य सः (बुद्धिहीनः, अबुद्धिः, नष्टबुद्धिः) ।

(झ) त्रुटिशून्यगणना (बहुव्रीहिः, द्विगुः, कर्मधारयः) ।

(ञ) गुरुद्रव्यम् (गुरु द्रव्यम्, गुरुः एव द्रव्यम्, गुरोः एव द्रव्यम्) ।

(ट) असंगतः (न संगतः, न एव संगतः, नास्ति संगतः) ।

8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।

(क) अधिगतम् = अधि + ______ + क्त । (गम्, नम्, रम्)

(ख) अधीतम् = अधि + इ + ______ । (क्त, क्तवतु, ल्यप्)

(ग) पृष्टः = ______ + क्त । (पुष् , पृष् , प्रच्छ्)

(घ) आकृतिः = आ + कृ + ______ । (क्तिन् , ल्यप् , शतृ)

(ङ) हीनः = ______ + क्त । (ही, हा, धा)

9. स्त्रीप्रत्यये रूपाणि लिखत–

महत्, पुत्र, राजन्, मूर्ख, एतादृश्, मनुष्य, बुद्धिहीन ।

■